# vaMshavRiddhikaraM durgA kavacham or vaMshakavacham

# વંશવૃદ્ધિકરં દુર્ગાકવચમ્ અથવા વંશકવચમ્

## Document Information

Text title : vaMsha vRiddhikaraM durgaa kavacham

File name : vanshavRiddhikaradurgAkavacha.itx

Category : kavacha, devii, durgA, devI

Location : doc_devii

Author : jnaana bhaaskara

Transliterated by : Arun Shantharam shantharam.arun at gmail.com

Proofread by : Arun Shantharam shantharam.arun at gmail.com

Latest update : April 12, 2009

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2021

*sanskritdocuments.org*

# vaMshavRiddhikaraM durgA kavacham or vaMshakavacham

# વંશવૃદ્ધિકરં દુર્ગાકવચમ્ અથવા વંશકવચમ્

ભગવન્ દેવ દેવેશકૃપયા ત્વં જગત્ પ્રભો ।
વંશાખ્ય કવચં બ્રૂહિ મહ્યં શિષ્યાય તેऽનઘ ।
યસ્ય પ્રભાવાદ્દેવેશ વંશ વૃદ્ધિર્હિજાયતે ॥ ૧॥

॥ સૂર્ય ઊવાચ ॥

શ‍ૃણુ પુત્ર પ્રવક્ષ્યામિ વંશાખ્યં કવચં શુભમ્ ।
સન્તાનવૃદ્ધિર્યત્પઠનાદ્ગર્ભરક્ષા સદા નૃણામ્ ॥ ૨॥

વન્ધ્યાપિ લભતે પુત્રં કાક વન્ધ્યા સુતૈર્યુતા ।
મૃત વત્સા સુપુત્રસ્યાત્સ્રવદ્ગર્ભ સ્થિરપ્રજા ॥ ૩॥

અપુષ્પા પુષ્પિણી યસ્ય ધારણાશ્ચ સુખપ્રસૂઃ ।
કન્યા પ્રજા પુત્રિણી સ્યાદેતત્ સ્તોત્ર પ્રભાવતઃ ॥ ૪॥

ભૂતપ્રેતાદિજા બાધા યા બાધા કુલદોષજા ।
ગ્રહ બાધા દેવ બાધા બાધા શત્રુ કૃતા ચ યા ॥ ૫॥

ભસ્મી ભવન્તિ સર્વાસ્તાઃ કવચસ્ય પ્રભાવતઃ ।
સર્વે રોગા વિનશ્યન્તિ સર્વે બાલગ્રહાશ્ચ યે ॥ ૬॥

॥ અથ દુર્ગા કવચમ્ ॥

ૐ પુર્વં રક્ષતુ વારાહી ચાગ્નેય્યાં અમ્બિકા સ્વયમ્ ।
દક્ષિણે ચણ્ડિકા રક્ષેન્નૈરૃત્યાં શવવાહિની ॥ ૧॥

વારાહી પશ્ચિમે રક્ષેદ્વાયવ્યામ્ ચ મહેશ્વરી ।
ઉત્તરે વૈષ્ણવીં રક્ષેત્ ઈશાને સિંહ વાહિની ॥ ૨॥

ઊર્ધ્વાં તુ શારદા રક્ષેદધો રક્ષતુ પાર્વતી ।
શાકંભરી શિરો રક્ષેન્મુખં રક્ષતુ ભૈરવી ॥ ૩॥

કણ્ઠં રક્ષતુ ચામુણ્ડા હૃદયં રક્ષતાત્ શિવા ।

ઈશાની ચ ભુજૌ રક્ષેત્ કુક્ષિં નાભિં ચ કાલિકા ॥ ૪ ॥

અપર્ણા હ્યુદરં રક્ષેત્કટિં બસ્તિં શિવપ્રિયા ।
ઊરૂ રક્ષતુ કૌમારી જયા જાનુદ્વયં તથા ॥ ૫॥

ગુલ્ફૌ પાદૌ સદા રક્ષેદ્બ્રહ્માણી પરમેશ્વરી ।
સર્વાઙ્ગાનિ સદા રક્ષેદ્દુર્ગા દુર્ગાર્તિનાશની ॥ ૬॥

નમો દેવ્યૈ મહાદેવ્યૈ દુર્ગાયૈ સતતં નમઃ ।
પુત્રસૌખ્યં દેહિ દેહિ ગર્ભરક્ષાં કુરુષ્વ નઃ ॥ ૭॥

ૐ હ્રીં હ્રીં હ્રીં શ્રીં શ્રીં શ્રીં ઐં ઐં ઐં
મહાકાલી મહાલક્ષ્મી મહાસરસ્વતી રુપાયૈ
નવકોટિમૂર્ત્યૈ દુર્ગાયૈ નમઃ ॥ ૮॥

હ્રીં હ્રીં હ્રીં દુર્ગાર્તિનાશિની સંતાનસૌખ્યમ્ દેહિ દેહિ
બન્ધ્યત્વં મૃતવત્સત્વં ચ હર હર ગર્ભરક્ષાં કુરુ કુરુ
સકલાં બાધાં કુલજાં બાહ્યજાં કૃતામકૃતાં ચ નાશય
નાશય સર્વગાત્રાણિ રક્ષ રક્ષ ગર્ભં પોષય પોષય
સર્વોપદ્રવં શોષય શોષય સ્વાહા ॥ ૯॥

॥ ફલ શ્રુતિઃ ॥

અનેન કવચેનાઙ્ગં સપ્તવારાભિમન્ત્રિતમ્ ।
ઋતુસ્નાત જલં પીત્વા ભવેત્ ગર્ભવતી ધ્રુવમ્ ॥ ૧॥

ગર્ભ પાત ભયે પીત્વા દૃઢગર્ભા પ્રજાયતે ।
અનેન કવચેનાથ માર્જિતાયા નિશાગમે ॥ ૨॥

સર્વબાધાવિનિર્મુક્તા ગર્ભિણી સ્યાન્ન સંશયઃ ।
અનેન કવચેનેહ ગ્રન્થિતં રક્તદોરકમ્ ॥ ૩॥

કટિ દેશે ધારયન્તી સુપુત્રસુખ ભાગિની ।
અસૂત પુત્રમિન્દ્રાણાં જયન્તં યત્પ્રભાવતઃ ॥ ૪॥

ગુરૂપદિષ્ટં વંશાખ્યમ્ કવચં તદિદં સુખે ।
ગુહ્યાદ્ગુહ્યતરં ચેદં ન પ્રકાશ્યં હિ સર્વતઃ ॥ ૫॥

ધારણાત્ પઠનાદસ્ય વંશચ્છેદો ન જાયતે ।
બાલા વિનશ્યંતિ પતન્તિ ગર્ભાસ્તત્રાબલાઃ કષ્ટયુતાશ્ચ વન્ધ્યાઃ ॥ ૬ ॥

બાલ ગ્રહૈર્ભૂતગણૈશ્ચ રોગૈર્ન યત્ર ધર્માચરણં ગૃહે સ્યાત્ ॥

॥ ઇતિ શ્રીજ્ઞાનભાસ્કરે વંશવૃદ્ધિકરં વંશકવચં
સમ્પૂર્ણમ્ ॥

Encoded and proofread by Arun Shantharam shantharam.arun at gmail.com

---

*vaMshavRiddhikaraM durgA kavacham or vaMshakavacham*

pdf was typeset on June 8, 2021

Please send corrections to *sanskrit@cheerful.com*